Shri Raghunath Temple MSS. Library,
JAMMU

No. १२६५

Title ईश्वरवाद:

Author लघुदेव:

Extent 6 Age x

Subject न्यायवैशेषिकम्

८ – पत्र

ईश्वरवादः

१२७५

११८

२२६५

ईश्वरवाद

१५०

॥श्रीगणेशाय नमः॥ अथेश्वरसमुद्भावेन प्रत्यक्षं प्रमाणं॥ आत्मप्रत्यक्षानुकूलस्यात्म
१ दीय.विजातीयमनःसंनिकर्षस्य तत्राभावात् अन्यथा [illegible] त्मनोपि प्रत्यक्षापत्तेः ना
पि यः सर्वज्ञ इत्यादिश्रुतयस्तत्र प्रमाणं श्रुतीनामीश्वरोक्तत्वेनैव प्रामाण्येन तत्संदेहे तासां सं
दिग्धप्रामाण्यकत्वात्॥ न च नित्यत्वेन यन्त्रिदोषवत्वेनैव तासां प्रामाण्यमिति वाच्यं वर्णानाम
नित्यतायाम् अव्यवस्थापितत्वात्॥ किंतु क्षित्यादिपक्षकसकर्तृकत्वानुमानं तत्र प्रमाणं अपरा
थानुमाने विप्रतिपत्त्योः विवादाध्यासितकर्तृकत्वं सकर्तृकं न चेत्यादयो बोध्याः॥ न चात्र किं
पक्षतावच्छेदकं न च विवादविषयकर्तृकत्वं तदिति वाच्यं तस्य दुर्वचत्वात्॥ न च सकर्तृकत्वप्र
कारकसंदेहविशेष्यतावच्छेदकत्वमेव तदिति वाच्यं घटस्यापि कदाचित्सकर्तृकत्वप्रकारक राम
संदेहविशेष्यतावच्छेदकीभूतघटत्वावच्छेदेन सिद्धसाधनस्य दुर्वारत्वात्. न चावच्छेदकावच्छे १
देन साध्यसिद्धेरुद्देश्यत्वांदृशातः सिद्धसाधनस्यादोषत्वमिति वाच्यं॥ तथापि यत्रांकुरादिविशेषे

सकर्तृकत्वस्य न संदेहस्तत्र साध्यासिद्धेः॥ न च जन्यत्वमेवात्र पक्षतावच्छेदकं अंशतः सिद्धसाधनस्य पू
र्ववद्दोषत्वादिति वाच्यं हेतुपक्षतावच्छेदकयोरैक्यप्रसंगात् इति चेन्न॥ जन्यत्वस्यैवाच पक्षता
वच्छेदकत्वात्॥ न चोक्तदोषः तस्य स्वरूपसंबंधविशेषरूपतया कार्यत्वस्याननुगमाद् इति हेमि
त्वरूपतयोक्तानुपपत्तेरभावात्॥ कथं तदनुमानेन संभवति॥ ध्वंसस्यासमवेततया सकर्तृकत्व
स्य स्योपादानगोचरापरोक्षज्ञानचिकीर्षासमानाधिकरणकृतिजन्यत्वरूपस्याभावेन बाधादिति॥
न च तत्र स्वोपादानगोचरत्वाविवक्षायां प्रयोजनाभाव इति वाच्यं तथा सति दृष्टजनकास्मदीयतथा
विधकृतिजन्यत्वमादाय सिद्धसाधनापत्तेः न च दृष्टान्तपक्षसाधारणस्य तत्त्वस्यैक्याभावात्तथा नि
वेशो न संभवतीति वाच्यं॥ समवायसंबंधेन कार्यत्वावच्छिन्नं प्रति विषयताप्रत्यासत्त्यैव कृत्यादेर्हेतु
ततया विषयताप्रत्यासत्त्या च कृतेर्न तथाविधकृतिनिष्ठकारणतानिरूपितसमवायसंबंधावच्छि
न्नकार्यत्वस्य तदर्थत्वसंभवे नानुपपत्त्यभावादिति चेन्न॥ रूपत्वाविशिष्टतत्त्वस्य ध्वंसप्रतियोगि

।वि।शिष्टजन्यत्वस्य वा पक्षतावच्छेदकत्वे न्यूनदोषात् यत्तु कर्तृकत्वमिह न स्योपादानगोचरत्व
२ गर्भं तथापि तु स्वजननस्वरूपयोग्यत्वादृष्टजनकं यद्यत्तदृष्टकूटावच्छिन्नत्वाविधकृतिजन्यत्वं त
थापि तु सिद्धसाधनवारणात्। एवं च ध्वंसे तथाविधसाध्याभावान्निर्णये न बाधासंभवात् जन्यत्वस्य
शुद्धस्य पक्षतावच्छेदकत्वेऽपि न क्षतिः कुत एव कार्यसामान्यं प्रति ईश्वरकृतिः कारणमिति प्रवादोऽपि
संगच्छते। अन्यथा समवेतकार्यत्वे वतस्या हेतुतयानुपदर्शितप्रवादो व्याहन्येतेति नत्र न तन्त्र
।क्षितित्वस्य पृथिवीत्वापरपर्यायस्य सामानाधिकरण्येन पक्षतावच्छेदकत्वे घटादिकमादाय सिद्ध
साधनात्। अवच्छेदकावच्छेदेन तथात्वे परमाणौ हेतोर्भागासिद्धिरिति। यत्तु अंकुरत्वं द्व्यणुकत्वं नित्य
समवेतत्वमात्रं वा पक्षतावच्छेदकमिति। तदपि मंदं। जन्यमात्रे सकर्तृकत्वासिद्धेः। अनुमानांतरकल्प राम
ने गौरवाच्चेति। ननु किमत्र साध्यं न तावत् ज्ञानचिकीर्षासमानाधिकरणकृतिनिष्ठविषयताप्रत्यास
त्त्यवच्छिन्नकारणतानिरूपितसमवायसंबंधावच्छिन्नकार्यत्वं सामानाधिकरणकृतिनिष्ठविषयता २

प्रत्यासत्त्यवच्छिन्नकारणतानिरूपितसमवायसंबंधावच्छिन्नकार्यत्वसामानाधिकरणकृतिनिष्ठ
विषयता प्रत्यासत्त्यवच्छिन्नकारणता। निरूपितसमवायसंबंधावच्छिन्नकार्यत्वसामाना
धिकरण्यं न विशेषे प्रयोजनाभावात् व्यर्थविशेषणत्वाच्च व्याप्यत्वेन व्यर्थविशेषणत्वमि
ति प्रवादस्य निर्युक्तिकतया श्रद्धेयत्वात् न च मास्तु तन्निवेश इति वाच्यं नित्यासतीश्वरस्य
ज्ञानेच्छयोरसिद्ध्यापत्तेः न च कृतेः साक्षाद्विषयतानिरूपकत्वाभावेनेश्वरकृतौ सविषय
कज्ञानसमानाधिकरणेच्छासामानाधिकरण्यरूपपरत्वेन विषयत्वसंपत्त्यर्थं ईश्वरे ज्ञानेच्छ
योरंगीकार आवश्यक इति वाच्यं जीवनयोनियत्नादर्शात् कृतेर्विषयकत्वेऽपि विरहात् य
दि चादृष्टवदात्मसंयोगस्येव प्राणपंचकसंचारजनकत्वं संभवेन जीवनयोनियत्ने मानाभा
वेन कृतेः सविषयकत्वनियमस्याप्यहततया ईश्वरप्रत्ययस्यापि सविषयकतेति विभाव्येत

६ वा.

३

तथापि नक्षतिः॥ कृतौ साक्षादनिरिक्तविषयतानिरूपकत्वादुपगमे नैवोपपन्नौ तत्र ज्ञानेच्छयो
ईश्वरप्रयत्नस्यो(ऽ)ङ्गीकारस्य निष्प्रयोजनकत्वात्॥ नच कृतेर्ज्ञानित्वापत्तिः साक्षाद्विषयितावत्त्व
स्य ज्ञानत्वव्याप्यत्वादिति वाच्यं तादृशनियमे मानाभावादिति यत्तु ज्ञानादित्रितयजन्यत्वस्य प्रवृत्तेः
साध्यत्वादीश्वरस्य ज्ञानादिसिद्धिरिति तन्न॥ अप्रयोजकत्वात्॥ अन्वयव्यतिरेकाभ्यां कार्यत्वावच्छे
न्नं प्रति कृतित्वेनैव हेतुत्वस्य क्लृप्तत्वात्॥ न चाविनिगमनाविरहात् ज्ञानत्वादिनापि हेतुत्वमायास्यती
ति वाच्यं तादृशकार्यकारणभावग्राहकान्वयव्यतिरेकाभावात् अत एव ज्ञानेच्छयोः कृतिविषयत्वमात्र
साध्यत्वमित्यपि परास्तं अप्रयोजकत्वादिति चेन्नैवं उपदर्शितकार्यकारणभावरूपानुकूलतर्कव
त्वेन सकर्तृकत्वसाधकानुमानात् कार्यत्वावच्छेदेन कृतिजन्यत्वासिद्धौ कृतौ अन्वयव्यतिरेकाभ्यां राम
अशरीरिसमवेतत्वानिरिक्तसमवेतत्वबाधसहकृतात् इयं कृतिः समवेता गुणत्वादित्यनुमा ३
नादीश्वरसिद्धौ वेदः सकर्तृकः उच्चरितवाक्यत्वादित्यनुमानादितरबाधबलात्तत्रेश्वरकर्तृकत्वसि

द्धो सेन वेदस्य प्रामाण्ये सिद्धे यः सर्वज्ञ इत्यादि श्रुतिभ्य एव तस्य सर्वविषयकज्ञाने छासिद्धेः र प्रतु हत्वा
त् कार्यत्वावच्छिन्नं प्रति कृतित्वेन हेतुत्वे ऽतत्स्यात् देवतु कुत इति चेत् तदवेहि घटादिस्थले कुलाला
दि कर्तॄणामन्वयव्यतिरेकाभ्यां घटादिकं प्रति कृतित्वेन हेतुत्वे कल्पनीये लाघवात्कार्यत्वावच्छिन्नं
प्रत्येव तत्कल्प्यते न तु घटत्वावच्छिन्नं प्रति ॥ अनेककार्यकारणभावकल्पने गौरवा
त् न च भवन्मतेपि कालिकसंबंधेन घटत्वादिमत्त्वमारायावच्छिन्नविनिगमनाविरहेपा घटत्वादिभेदेन का
र्यकारणभावः ॥ भेदस्यावश्यकत्वात्तया मन्मते न गौरवावकाश इति वाच्यं समवायसंबंधेन घट
त्वादि विशिष्टं प्रति कृतित्वेन हेतुत्वे घटादिनामादि विनिगमनाविरहेण नानाकार्यकारणभा
वस्य दुरुद्धरतया गौरवस्य दुरुद्धरत्वादिति । विशेषतोऽन्वयव्यतिरेकाभ्यामपि सामान्यकार्यका
रणभावसिद्धिः ॥ अन्यथा कार्यत्वावच्छिन्नं प्रत्युपादानत्वेनापि हेतुत्वासिद्ध्या निरुपादानकका
र्योत्पत्तिप्रसंगात् ॥ अत एवात्मतत्त्वविवेके ईश्वरानुमानप्रस्तावे निरुपादानकार्योत्पत्तिप्रसं

त्युक्तमाचार्यैः॥ अस्तु वा घटत्वाद्यवच्छिन्नं प्रतिकर्तृत्वेन विशिष्य हेतुतात्तथापि सर्गाद्यकाली
४ नघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वादिसाधनेऽस्मासिद्धिरप्रत्याहे वयस्तु जन्यं सकर्तृ
कं शरीराजन्यत्वादित्यादिना सत्प्रतिपक्षसंभवात् नानुमानाजन्यमात्रे सकर्तृकत्वसि
द्धिः॥ न चात्र च शरीर विशेषणस्य व्यभिचारावारकत्वेन व्यर्थत्वान्न तु स्य वमनेति वाध्यं तस्य
व्यभिचारावारकत्वेपि स्वरूपासिद्धिस्वरूपस्य तथाविधव्यर्थविशेषणत्वस्य तत्र सत्त्वान्न तु
स्य वलता: अतएवोक्तमाचार्यैरात्मतत्त्वविवेके ईश्वरवादे: एकामसिद्धिं परिहरतो द्विती
यापत्तेरिति। ति वाच्यं आधिक्यो व्यर्थविशेषणस्य निग्रहस्थलमात्रसंपादकतया व्य
र्थविशेषणवत्त्वज्ञानस्य व्याप्तिग्रहप्रतिबंधकत्वे मानाभावेन तस्य काप्यसिद्धिमध्यानान्त राम
न तयानुपपन्नरेभावात्॥ न चाचार्यवचनविरोधः॥ तद्वचनस्याभ्युपेत्यवादत्वात् न च ग्र ४
हधर्मस्य व्याप्यतावच्छेदकत्वाभावेन साध्यसंबंधितावच्छेदकलक्षणव्याप्तिः तस्य प्रतिव

प्रतियोगितावच्छेदकत्वाभावेन च यद्धर्मविशिष्टाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्वावच्छि
न्नप्रतियोगिताकाभावाघटितव्याप्तिरादितत्त्वभावादतुल्यबलतया न तेन सत्प्रतिपक्षसंभव इति
वाच्यं गुरुधर्मस्य व्याप्यतावच्छेदकत्वाभावे प्रतियोगितावच्छेदकत्वाभावे वा प्रमाणाभावेन तन्नापि
व्याप्तिसत्त्वादिति तदपि न प्रतिस्थापनानुमानहेतोरप्रयोजकतया स्थापनानुमानहेतोस्तु एवदर्शि
तकार्यकारणभावरूपानुकूलतर्कसत्त्वे सकर्तृकत्वव्याप्यत्वनिर्णयेन व्याप्यापकत्वेन शारीरिक
र्तृकत्वादेः साध्याव्यापकतानुमाने साध्याव्यापकतानिर्णयासंभवात् नन्वीश्वरानुमानादीश्वरस्य
सत्त्वसिद्धावपि तस्यानित्यत्वे मानाभाव इति भाव इति वाच्यं सत्त्वनित्यत्वे लाघवमिति लाघवतर्क
सहकृतानुमानेनैव तत्सिद्धेः एवं ज्ञानेच्छयोरपि नित्यसिद्धिरूहनीया: जन्यत्वे ध्वंसप्रागभावादिक
ल्पनागौरवात् एवं त्रयाणां प्रत्येकमेकत्वमपि लाघवात्सिद्धमिति अत एवेश्वरस्य शरीरे बाधका
भावात् ज्ञानादित्रयमपि जन्यमिति निरस्तं भोगावच्छेदकस्य शरीरस्य तत्र कल्पनायाम् असंभवाच्च

वा· ६ न च शरीरत्वं प्राणिनिरिति वाच्यं । पृथिवीत्वादिसांकर्येणातदसंभवात् । न च पृथिवीत्वादिव्याप्यविरुद्धमे
दि न शरीरत्वमानात्वांगीकारान्नानुपपत्तिरिति वाच्यं । तथा सति चेष्टां प्रतिशरीरहेतुताया अननुगमेन
५ व्यभिचारात् । नानाजातिकल्पने गौरवाच्च अतएव शरीरैकत्वनिष्ठजातिविशेषकल्पने चेष्टात्वा
5 वच्छिन्नं प्रति विजातीयैकत्ववत्त्वेन हेतुत्वकल्पनान्नानुपपत्तिरित्यपि परास्तं । तादृशजातेः परिमा
णत्वादिनिष्ठतामादाय विनिगमनाविरहेणानन्तजातिकल्पनापत्तेश्च । न च भोगावच्छेदकत्वं शरीरत्व
मिति मतेऽपि सुखाद्यवच्छेदकत्वमादाय विनिगमनाभाव इति वाच्यं । विजातीयैकत्ववत्त्वं शरीरत्व
मिति तेऽपि अवच्छेदकतासंबंधेन भोगसुखादिमत्त्वमादाय विनिगमनाभावस्य दुर्वारतथा तथावि
धा इति भिन्नजातिकल्पनाप्रयुक्तगौरवस्य दुरुद्धरत्वादिति । अदृष्टाधारस्य शरीराभावे अंकुराद्युत्पत्तिर्भिन्न राम
र्ये चेष्टात्वेन हेतुतानुपपन्ना व्यभिचारादिति चेन्न तथाविधहेतुहेतुमद्भावे प्रमाणाभावात् । विशिष्य
घटत्वाद्यवच्छिन्नं प्रत्येव तस्या हेतुत्वात् । अतएवेश्वरस्य परमाणुरूपाणि नाना शरीराणि न तु स्थूल ५

सूक्ष्मशरीरमेकं । तथासति ईश्वरस्य पाषाणमध्यवर्त्तिभेकशरीरे कर्तृत्वानुपपत्तेः तत्राभग्नस्य
स्थूलशरीरस्य प्रवेशासंभवात् । अतएवात्मविवेके ईश्वरवादे । अदृश्यस्यादिसावयवत्वया मू-
र्त्ततया च निविडतरपाषाणवर्त्तिभेकशरीरादौ कार्यकर्तृत्वेनाभग्नस्य प्रवेश इत्युक्तमाचार्यैर्न
चेश्वरस्य परमाणुरूपः शरीराङ्गीकारे तस्यान्तरालाभावेन निर्मनस्कतापत्तिरिति वाच्यं तस्य
वहिर्वर्त्तिमनःसंबन्धाङ्गीकारेणान्तरालिकनिर्मनस्कताया अनिष्टापत्ते एवं गोलकाद्यभावेन तत्र ब-
हिर्वर्त्तिचक्षुरादीन्द्रियसंबन्धोपि स्वीक्रियते एवं चेश्वरस्य ज्ञानादिकं जन्यमेव । न तत्कारणीभूतश-
रीरमनोयोगादेः संभवादित्यपि निरस्तं प्रलयवदात्मसंयोगासंभवाच्छिकारणक्रियाश्रयात्वा
वयववित्वरूपशरीरलक्षणस्य परमाणावसंभवेन शरीरत्वाभावाच्च यदि द्वीन्द्रियावयवित्व-
मानि वपुष्टुवत लक्षणमिति विभाव्यते तथापि नेश्वरस्य परमाणुरूपनानाशरीरसिद्धिः
अनंत [illegible] त्वाभावाच्च यदि चौ [illegible] शरीरकल्पने ज्ञानादेर्न्यत्वकल्पने

वा च गौरवात्॥ वस्तुतस्तु ईश्वरस्यानित्यज्ञानादिसिद्धौ तत्र जन्यप्रसक्तिर्नास्तीति ईश्वरस्य शरीरक
ल्पनमनर्थकमेवेत्युक्तं॥ एतेनेश्वरस्यैकमेव परमाणुरूपं शरीरं तत्संबंधीश्वरो दूरस्थमपि कार्यं
६ करोतीत्यादिकमपि निरस्तं शरीरि प्रयत्नवदात्मसंयोगाव्यवहितोत्तरोत्पन्नत्वस्य क्रिया
याउत्पादकत्वसंभवात्॥ एतएवाचार्यैर्न चेद्दूरस्थ एव सर्वं स तु कुर्यादिति सांप्रतमिति ग्रंथेनेश्वरस्य
परमाणुरूपं शरीरं ततः दूरस्थमपि कार्यं करोतीत्याशंक्य कार्यकारकानाधिष्ठानादित्यनेन तत
थैव समाहितमिति तस्मादुपदर्शितानुमानात् शरीरानवच्छिन्नेन वह्न्यादेः सिद्धेति तदाश्रय
यत्वेनेश्वरोपीति सांप्रदायिकानां वचनात्॥ पुनः पटचक्षुःसंयोगदशायां घटादिचाक्षुषवारण
णाय घटादिवृत्तिविषयतासंबंधेन ज्ञानं प्रति घटादिवृत्तिविषयतासंबंधेन ज्ञानं हेतुरवश्य राम
मुपेयः॥ तथा च घटनिर्विकल्पकात्पूर्वं तादृशहेतुसंपत्त्यर्थं ईश्वरज्ञानस्वीकारस्यावश्यकः त
दाश्रयत्वेनेश्वरसिद्धिः॥ न च घटचाक्षुषत्वस्य कस्यचित्कार्यतावच्छेदकत्वया न तदवच्छिन्ना ६

पत्तिसंभवेन तद्वारणायोक्तकार्यकारणभावस्यावश्यकत्वात् ॥ न च तद्वारणार्थं घटादिवृत्ति
लौकिकविषयतासंबंधेन प्रत्यक्षत्वावच्छिन्नं प्रति घटत्वादेर्नो विषयस्यैव हेतुतास्त्विति
वाच्यं एवमपि घटत्वादेरुत्पत्त्युक्तसमवायकालेपि घटत्वादिस्पार्शनस्यापत्तेर्वार
णाय घटत्वादिवृत्तिविषयतासंबंधेन प्रत्यक्षं प्रति घटत्वादिरात्तो विषयतासंबंधेन
ज्ञानत्वेन कारणत्वकल्पनस्यावश्यकत्वात् ॥ आश्रयभासकसामग्रीं विनापि तादृश
कारणबलात् वाकस्पार्शस्यास्पर्शनोत्पत्त्या आश्रयभासकसामग्र्याः सहकारि
त्वकल्पनाया असंभवात् ॥ न च स्पर्शवृत्तिविषयतासंबंधेन स्पार्शनं प्रति स्पर्शत्वे
न हेतुतामंगीकृत्य स्पर्शाश्रयभासकवान्नैसामग्र्यन्यतरस्य तत्र सहकारित्वाभ्युप
गमेनैव सर्वसामंजस्ये उपपद्य इति कार्यकारणभावो नैर्युक्तिक इति वाच्यं तथा सति
घटत्ववान् घटत्वाभाववान् इत्यादिशाब्दबोधानुमित्यादेर्वारणाय घटत्वान्यवृत्ति

वा. ।विषयतासंबंधेनज्ञानंप्रतिघटत्वाभोपाहितत्वेनाहेतुनाकल्पनेगौरवप्रसंगात् घट
त्वादिवृत्तिविषयतासंबंधेनज्ञानंप्रतिघटत्वादिवृत्तिविषयतासंबंधेनहेतुताकल्पने
१ ।पिनोक्तापत्तिर्धर्मितावच्छेदकतासंबंधेनघटत्वप्रकारकयोग्यताज्ञानेनघटत्व
व्याप्यवत्ताज्ञानादिनाचफलेजननीयेघटत्वादिवृत्तिविषयतासंबंधेनज्ञानस्य
सहकारित्वाभ्युपगमात्॥ नचघटत्वादिवृत्तिविषयतासंबंधेनज्ञानंप्रतिघटत्वादि
नाहेतुतयैवसर्वानुपपत्तिवारणसंभवात्। किंघटत्वादिवृत्तिविषयतासंबंधेनज्ञानहेतुत राम
येतिवाच्यं घटत्वत्वेवृत्तिविषयया घटत्वादिवृत्तिविषयतासंबंधेनज्ञानंप्रति। तेनसंबंधे
नज्ञानत्वेनलघुरूपेणहेतुनाकल्पनायाएवन्याय्यत्वात् एवंचतादृशकार्यकारणभाव १
सहकृतात्सर्वाद्यकोलानघटत्वादिनिर्विकल्पकंज्ञानजन्यं।निर्विकल्पकत्वादिदानींतनन
।निर्विकल्पकवदित्यनुमानादेकनित्यज्ञानासिद्धौतदाश्रयत्वेनेश्वरकल्पनीयइतिवदंति॥